|| श्री ||

|| श्री रङ्गनाथः प्रसीदतु ||

श्रीसत्याभिज्ञाविजयः

रचयिता

केशव श्रीनिवासाचार्य कट्टी

१९८७

॥ श्रीदिग्विजयरामो विजयते ॥

श्रीमदुत्तरादिमठाधीश
श्री श्री १००८ श्रीसत्यप्रज्ञतीर्थकरकमलसंजात
श्री श्री १००८ श्रीसत्याभिज्ञतीर्थश्रीपादानां चरितं

श्रीसत्याभिज्ञविजयः

तत्पादपद्माराधकेन श्री कट्टी हणमंताचार्यसुत
श्रीनिवासाचार्यतनूजेन केशवेन
विरचितः

शके १९०९ प्रभव संवत्सर रामनवमी

पाठमूल्यम्

प्रकाशकः रामाचार्य वें. कट्टी
(श्री श्री १००८ श्रीसत्याभिज्ञतीर्थश्रीपादानां पूर्वाश्रमतनूजः)
उत्तरादिमठीयावारः, शंकरपुरम्
बेंगळूर–560004.

प्रथमावृत्तिः १९७२

द्वितीयावृत्तिः १९८७

मुद्रकः धनंजय बाळाचार्य वरखेडकर
सुधामुद्रणमन्दिरम्
उत्तरादिमठीयावारः, शंकरपुरम्
बेंगळूर–560004.

विषयसूची

प्रथमः सर्गः

द्वितीयः सर्गः

तृतीयः सर्गः

चतुर्थः सर्गः


पंचमः सर्गः

श्री १००८ श्री सत्याभिज्ञतीर्थश्रीपादाः



सत्प्रज्ञतीर्थोद्भवमच्युताङ्घ्रिश्रितं प्रपन्नालिभवार्तिशोषम् ।
शुद्धं विनिद्रं सदभिज्ञपादपद्मं भजे ज्ञानसुधासमृद्धम् ॥

श्री १००८ श्री सत्यप्रमोदतीर्थश्रीपादाः



श्रीसत्याभिज्ञतीर्थाङ्घ्रिसेवासम्प्राप्तवैभवान् ।
श्रीसत्यप्रमोदतीर्थार्यान्गुरून्वन्दे निरन्तरम् ॥

॥ श्रीरङ्गनाथः प्रसीदतु ॥

श्रीसत्याभिज्ञविजयः

श्रीमङ्गलमूर्तये नमः ॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ

श्रियः पतिं गुणोदीर्णं निर्दोषं ज्ञानगोचरम् ।
वन्दे मुक्तिप्रदं भक्त्या रङ्गनाथं दयानिधिम् ॥ १ ॥
अज्ञानतिमिरव्याप्तिप्रणाशपटुगोततिम् ।
तत्वप्रकाशनपरं वन्दे मध्वदिवाकरम् ॥ २ ॥
कृपाकलाऽपि येषां वै सकलाभीष्टवर्षिणी ।
जयार्यप्रभृतीन्वर्यान्प्रणमामि गुरूत्तमान् ॥ ३ ॥
सूत्राणां भेदतात्पर्यं परोक्तैरेव साधयन् ।
विचित्रविजयी पातु सत्यध्यानगुरूत्तमः ॥ ४ ॥
वाक्यार्थचन्द्रिकागोभिः प्रीणयन्तं सतोऽनिशम् ।
सत्यप्रज्ञमुनीन्द्रं तं प्रपद्ये शिष्यवत्सलम् ॥ ५ ॥
सत्यप्रज्ञकराब्जोत्थान् सुधापाठनतत्परान् ।
सदभिज्ञगुरून्वन्दे सत्प्रमोदार्यसेवितान् ॥ ६ ॥
अपास्याद्वैतमसुधां ये सुधां समपाययन् ।
तान् सुधामण्डनाचार्यान् गुरून्वन्दे निरन्तरम् ॥ ७ ॥

श्रीसत्याभिज्ञविजयव्याख्यानम्

श्रीरङ्गनाथमावन्द्य मध्वार्यादिगुरूंस्तथा ।
श्रीसत्याभिज्ञविजयं व्याख्यास्यामि सतां मुदे ॥

१. स्वकुलदेवतायाः रङ्गनाथस्य नमस्कारात्मकं मङ्गलमाचरति **श्रियः इति** । अस्मिन्सर्गे प्रायः पथ्यावक्त्रं वृत्तम् ।

स्वोत्तमान्सकलान्नत्वा तत्कृपालवमाश्रितः ।
श्रीसत्याभिज्ञचरितं वर्णयामि यथामति ॥ ८ ॥
जगद्गुरोः क्व चरितं क्व मे मन्दतमा मतिः ।
मुमुक्षुर्गुरुकारुण्यादस्मि साधनदुर्बलः ॥ ९ ॥
प्रार्थयिष्यं यदि यशोऽगमिष्यमपहास्यताम् ।
दयालेशैककाङ्क्षित्वाद्दयनीयोऽस्म्यहं सताम् ॥ १० ॥
अस्ति शस्ततटे पुण्यवरदायाः शुभावहः ।
कूसनूराभिधो ग्रामो जन्मभूमिर्महात्मनाम् ॥ ११ ॥
तमेतं धर्मनिरतो गोविन्दार्याभिधो बुधः ।
त्यक्तग्राम्यसुखो ग्राममावसद्भूसुराग्रणीः ॥ १२ ॥
समर्थं स्वकुलोद्धारे समवाप्तुमनाः सुतम् ।
स महिष्या समं भक्त्या श्रीनिवासमसेवत ॥ १३ ॥
अथासूत सुतं साध्वी वेङ्कटेशप्रसादतः ।
दुःखहं सुखदं ब्रह्मदृष्टिर्मोक्षमिवाचिरात् ॥ १४ ॥
अभिषिञ्चन्सुतं तात आनन्दाश्रुभिरातनोत् ।
श्रुतिसाम्राज्यपीठेऽस्याभिषेके पूर्वपीठिकाम् ॥ १५ ॥
तस्यानुग्रहतो लब्धं कृतकृत्यः पितोत्तमम् ।
तस्यैव विदधौ नाम्ना वेङ्कटेशं स्वनन्दनम् ॥ १६ ॥
वेङ्कटेशाद्रिमेवासौ गन्ताऽग्रे गुरुपुङ्गवः ।
इतीव वा सुतं नाम्ना वेङ्कटेशं बुधो व्यधात् ॥ १७ ॥

उपनीय स सद्ध्यानतीर्थाय सुतमार्पयत् ।
रामार्हणोचितं कर्तुं शिल्पिने सन्मणिं यथा ॥ १८ ॥
सच्छास्त्रपारदृश्वानं नचिराच्चक्रतुर्वटुम् ।
गुरोः प्रीतिश्च बालस्य श्रवणादि च सन्ततम् ॥ १९ ॥
ईतिकर्तव्यताऽप्येषा श्रवणादेर्गरीयसी ।
गुरोः प्रीतिर्ज्ञानसिद्धौ मीमांसेव श्रुतेरभूत् ॥ २० ॥
विद्याकन्यां यथाकालं ददानो वरदक्षिणाम् ।
गुरुरेवास्य मुख्योऽभूच्छ्वशुरः प्रथमो बटोः ॥ २१ ॥
उवाहाथ स विप्रेन्द्रहुच्चार्यप्रतिपादिताम् ।
सुवर्णालंकृतां कन्यां वेदविद्यामिवापराम् ॥ २२ ॥
उत्सर्गतो बन्धहेतुर्भोगोऽप्यस्यास्य मुक्तये ।
विष्णुप्रीत्यर्थसङ्कल्पसहकारिसमाश्रयात् ॥ २३ ॥
नन्दनोऽजनि दम्पत्योः पितॄणामृणमोचकः ।
रामार्याख्यस्तथा पुत्री द्विकुलोद्धारकारिणी ॥ २४ ॥
सत्यध्यानमुनिश्रेष्ठो द्वैतसिद्धान्तकेसरी ।
ररक्ष सुचिरं वेदान् मायिगोमायुनिर्जयी ॥ २५ ॥
ततोऽभिषिच्य तनयं सत्यप्रज्ञं निजासने ।
स चैत्रस्य सितेऽष्टम्यां रामध्यानपरोऽभवत् ॥ २६ ॥

---

१. इतिकर्तव्यता सहकारिकारणम् । गुरुप्रीतेर्गरीयस्त्वं 'गुरुप्रसादो बलवान्' इति स्मृतिसिद्धम् । ब्रह्ममीमांसायाः श्रुत्यपेक्षया गरीयस्त्वं 'अथ परा यया तदक्षरमधिगम्यते' इति श्रुतिसिद्धम् ।

त्यक्त्वाऽपि वसुधामेष सुधां त्यक्तुमथाक्षमः ।
आस्ते न्यायसुधाचार्यजयार्यपदसन्निधौ ॥ २७ ॥

प्रतिष्ठां स्वगुरोर्वृन्दावने विठ्ठलसन्निधौ ।
सत्प्रज्ञो विदधे चात्महृदि तद्भक्तिसन्निधौ ॥ २८ ॥

स पंढरपुरे चक्रे सुसमाराधनोत्सवे ।
प्रकामं तर्पितान्विप्रानन्नवासोधनार्पणैः ॥ २९ ॥

यवनाधिष्ठिते देशेऽप्ययवनाधिष्ठितः सताम् ।
चचार शोधयन् साधून् मणीनिव गुणोज्झितान् ॥ ३० ॥

प्रत्यप्यर्थिं स धनिनां वियुक्तो लौकिकादृणात् ।
गुरोर्नालौकिकाद्यस्मान्नैवास्यास्ति प्रतिक्रिया ॥ ३१ ॥

अशने रागहीनोऽपि वसनेऽभूत्स रागवान्[१] ।
विषयाद्विमुखः शब्दविषये सर्वदोन्मुखः ॥ ३२ ॥

अकामस्यापि कामौ द्वौ प्रावर्धेतां क्षणे क्षणे ।
वाक्यार्थचन्द्रिकापाठे श्रीरामाङ्घ्र्यर्चने तथा ॥ ३३ ॥

चातकायितशिष्याणां मुखोद्गतसुधारसैः ।
सभायां गुरुमेघोऽयं चित्रं शान्ततृषोऽभवत्[२] ॥ ३४ ॥

---

१. वसने रागवान् रक्तवस्त्रधरः । शब्दविषये परमात्मनि विरोधाभासः ।

२. लोके खलु मेघवृष्टरसैश्चातकानां तृषाशान्तिर्दृष्टा । अत्र पुनः स्वेनैव विद्यामृतवर्षैः पोषितानामत एव चातकायितानां छात्राणां मुखपाठकृतसुधानुवादं सभायां श्रुत्वा गुरुमेघस्यैव तृष्णाख्यो मनोरथः पूर्ण इति चित्रं इति भावः ।

द्वितीयखण्डनाद्विष्णवद्वितीयत्वसमर्थनात् ।
द्वितीया रायचूरे साऽद्वितीया शुशुभे सभा[1] ॥ ३५ ॥

वर्षत्रयेऽनिशसुधावार्षुको गुरुवारिदः ।
चक्रे द्विजार्थ्यफलदं मध्वसिद्धान्तपादपम् ॥ ३६ ॥

प्रेप्सुर्ज्ञानामृतं सत्यप्रज्ञमेघाद्धरेः पदे ।
मठ एवावसन्नित्यं वेङ्कटेशार्यचातकः ॥ ३७ ॥

शान्तो दान्त इति श्रुत्या पन्थानं बोधितं चरन् ।
सन्तताान गुरुश्रेष्ठं सन्तुष्टं सुतरां सुधीः ॥ ३८ ॥

समासादितमेतस्मात्सुप्रसन्नात् सुलक्षणात् ।
गुरोरासीदभिज्ञानं सत्यं स्वपदे[2]साधनम् ॥ ३९ ॥

वृष्टिग्रामे सुरेन्द्रांशटीकाकृत्पादसन्निधौ ।
सुधां शृण्वन् स सुचिरं मुमुदे वसुधासुरः ॥ ४० ॥

गुरुप्रवेक एतस्य प्रावण्यपरितोषितः ।
सर्वतन्त्रस्वतन्त्रोऽपि परतन्त्र इवाभवत् ॥ ४१ ॥

शास्त्राध्ययनपुण्यं स स्वामिपादे न्यवेदयत् ।
तदीयमेव तत्सर्वं स्वामी हि फलमश्नुते ॥ ४२ ॥

स मङ्गलमहं क्षेत्रे मळखेडे समातनोत् ।
जयतीर्थमुनेस्तन्वन्नात्मानं करुणापदम् ॥ ४३ ॥

---

१. समाधिकखण्डनपूर्वकं विष्णुसर्वोत्तमत्वसमर्थनात् द्वितीयवर्षे गुरूत्तमेन रायचूरनगरे प्रवर्तिता सभाऽसदृशशोभां बभारेति भावः ।

२. स्वपदं सत्याभिज्ञेतिसाम्राज्यपदं मोक्षपदं च ।

अभूत्तेन सुधापाठसमाप्तौ कृतमङ्गलम् ।
स्वीचिकीर्षितसन्यासव्रतस्याप्यादिमङ्गलम् ॥ ४४ ॥
वाक्यार्थचन्द्रिकापाठप्रवचोनित्यनिष्ठितः ।
आतकूरं ययौ जातु सत्यप्रज्ञमुनीश्वरः ॥ ४५ ॥
संपूर्य साधनं स्वीयं सर्वं संवत्सरत्रयात् ।
इयेष स दिवं गन्तुं हरेराज्ञा गरीयसी ॥ ४६ ॥
सन्त्यक्तसर्वचिन्तस्याप्यासीच्चिन्तेयमान्तरी ।
कः कुलद्वयसंशुद्धो वंशं मे धारयेदिति ॥ ४७ ॥
सत्सु प्रवचनाढ्येषु वेङ्कटेशार्य एव हि ।
स्वपादपूजने योग्य इति तं प्रैरयत्प्रभुः ॥ ४८ ॥
न मेधया न श्रुताद्यैः किन्तु यं वृणुते हरिः ।
तेनैव लभ्य इत्युक्तिं देव एवममानयत् ॥ ४९ ॥
हंसाग्र्यो रह आहूय प्राह विप्रं प्रसन्नधीः ।
जहीहि विषयस्नेहं भव सन्यासभागिति ॥ ५० ॥
ईरितं स्वगुरोः शीर्ष्णा धारयन् धीरमानसः ।
दारागारेषु विजहौ सारतानित्यतामतिम् ॥ ५१ ॥
नृणां सुदुस्त्यजान्मायागुणात्मविषयान्द्विजः ।
क्षणादेव विना यत्नात्तृणायामन्यतात्मवान् ॥ ५२ ॥
पत्नीं पुत्रौ च पितरौ वित्तं संरक्तबान्धवान् ।
यत्तत्याज हरिप्रीत्यै विरक्तिः सैव कीर्तिता ॥ ५३ ॥

---

१. मायागुणाः प्रकृतिगुणाः । तदात्मकान् प्राकृतान् ।

गुरुः स्वीकृतसंन्यासं स्थिरवैराग्यसम्पदम् ।
आत्मजं कृतिनं लब्ध्वा कृतकृत्यस्तदाऽभवत् ॥ ५४ ॥

अभ्यषिञ्चत्सुतं राज्ये जलैर्वारिजपूरितैः ।
तथा कारुण्यसलिलैर्नेत्रवारिजपूरितैः ॥ ५५ ॥

उपादिशच्च रहसि मन्त्रं यतिवरोचितम् ।
आदिशच्चोचितं नाम सत्याभिज्ञ इति श्रुतम् ॥ ५६ ॥

यत्सत्तदमृतं तीति मर्त्यं यच्छति ते उभे ।
सत्यो **हरिः परतरो** मुक्तामुक्तनियामकः ॥ ५७ ॥

सत्यं जगत् तथा धर्मैर्भेदकैस्**तत्त्वतो**ऽन्विताः ।
सुखदुःखादिभिः **सत्या भिन्ना जीवगणा** मताः ॥ ५८ ॥

ते च सत्येन हरिणा सत्तादित्रयसंयुताः ।
हरेरनुचराः सत्यस्वरूपोपाधिभेदतः ॥ ५९ ॥

नीचोच्चभावमनिशं गता मुक्तौ सृतौ तथा ।
निर्दुःखानन्दविषयोऽनुभवः सत्यशब्दितः ॥ ६० ॥

मुक्तिः सा **नैजसौख्यानुभू**तिर्हि परिकीर्तिता ।
तद्यापकश्च सन्स्नेहो**ऽमला भक्तिर्हि साधनम्** ॥ ६१ ॥

सत्त्वं स्वगोचराणां हि यापयत्यक्ष**पूर्वकम्** ।
त्रितयं मानमेतस्मात्सत्यमित्येव कीर्तितम् ॥ ६२ ॥

---

१. 'हरिः परतरः' इत्यादीनां श्रीमन्मध्वमतीयनवप्रमेयानां अभिधानात्मकत्वं सत्याभिज्ञेति नाम्नो वर्णयति नवभिः श्लोकैः ॥

सन्तो नित्याः श्रुतिगणा याप्यते तैर्न चेतरैः ।
तेन सत्योऽ**खिलाम्नायैकवेद्यो** हि हरिःस्मृतः ॥ ६३ ॥
एवं नव प्रमेयानि **श्रीमन्मध्वमते** गुरुः ।
जानाति सत्यान्यभितः आगमेभ्यः समन्ततः ॥ ६४ ॥
ज्ञापयत्यपिदुर्वादिभिया विरहितः स्थिरम् ॥
गुरूक्तमस्य तेन श्रीसत्याभिज्ञेतिमङ्गलम् ।
नामधेयं प्रशुशुभेऽत्यनुरूपस्वरूपकम् [1] ॥ ६५ ॥

चैत्राद्यपक्षस्य सिते द्वितीये सत्प्रज्ञतीर्थो गुरुरद्वितीयः ॥
कीर्तिं क्षितौ न्यस्य सदा सुखैकमूर्तिं हरेः पादमुपाससाद [2] ॥ ६६ ॥

तदा मर्शं मर्शं गुरुचरणसंस्पर्शजसुखम्
तथा दर्शं दर्शं तदनुदिनपाठार्चनभुवः ।
अयं स्मारं स्मारं परमसुपकारं गुरुकृतम् ।
अभूद्वारं वारं विरहजशुचा विक्लवमनाः [3] ॥ ६७ ॥

अविषहमपि सत्याभिज्ञतीर्थव्रतीन्द्रो
गुरुविरहसमुत्थं शोकसन्तापवह्निम् ।
कथमपि निजभक्त्या रङ्गनाथाङ्घ्रिपद्म-
स्मरणसलिलवर्षैर्यापयामास शान्तिम् [4] ॥ ६८ ॥

इति श्रीसत्याभिज्ञविजये श्रीरङ्गाङ्के प्रथमः सर्गः ॥

---

१. एतेन निरुक्तप्रकारेण सत्यशब्दोदितानि नवप्रमेयानि अभितो जानाति अभिनिर्भयं ज्ञापयति चेति सत्याभिज्ञशब्दार्थः सूचितो भवति ।

२. इन्द्रवज्रा ३. शिखरिणी ४. मालिनी

॥ श्री ॥

अथ द्वितीयः सर्गः

ततः स सत्प्रज्ञमुनीन्द्रबालः समस्तयोगीन्द्रकुलाधिपालः ।
प्रचक्रमे भक्तिविरक्तिवीर्यो गुरोः समाराधनमार्यवर्यः ॥ १ ॥

निजोत्तमप्रीत्युदयानुकूलव्यापारमाराधनमाहुरार्याः ।
प्रीतेश्च सत्प्रज्ञमुनेर्निदानं विष्णोः समस्तोत्तमताऽभिधानम् ॥ २ ॥

कुवादभङ्गं स्वमतोरुसङ्गं विना गुरोर्न प्रियमन्तरङ्गम् ।
अतः स सिद्धान्तविवृद्धिकारिसभां तदा प्रारभत व्रतीशः ॥ ३ ॥

पुरैष सद्धीरकराम्बुजोप्तस्तत्पुत्रपौत्रैरथ वृद्धिमाप्तः ।
अभूत्स एषोऽद्य सभाऽऽख्यवृक्षो मोक्षादिनानाफलदानदक्षः ॥ ४ ॥

गुरोर्नियोगं शिरसा दधानाः सम्भारसम्पादनसुप्रवीणाः ।
तूर्णं तदा शिष्यगणा अभूवन् समन्ततो दिक्षु कृतप्रयाणाः ॥ ५ ॥

सभाध्वरं रोधसि कृष्णवेण्याः प्रवर्त्स्यमानं गुरुणेति धन्याः ।
श्रुत्वैव सर्वेऽपि बुधाग्रगण्याः समापतन् द्राक् परिपक्वपुण्याः ॥ ६ ॥

कृष्णापगामज्जन-तप्तमुद्रा-श्रीरामसंदर्शन-पूर्वपुण्यम् ।
प्राप्तुं नराणां भृशमातुराणां समागमोऽभूच्च तथाऽमराणाम् ॥ ७ ॥

महामहे मङ्गलवाद्यघोषास्तथैव पुष्टस्वरवेदघोषाः ।
संपूर्य काष्ठा अमरोत्तमाणामामन्त्रणायेव दिवं प्रविष्टाः ॥ ८ ॥

पीतामृताः प्राक् पुनरत्र मध्वशास्त्रामृतं स्वादुतरं पिबन्तः ।
तृप्तिं न याता अभवन्नमर्त्या धरातले जन्मनि लुब्धचित्ताः ॥ ९ ॥

मुक्तेर्जनित्री परमान्नभुक्तिर्ह्यत्राभवच्चेन्द्रियसौख्यकर्त्री ।
प्राधान्यतो मोक्षफलाऽपि दृष्टिर्विष्णोर्यथैवान्यपुमर्थदात्री ॥ १९ ॥
अक्ष्णां द्विजा उत्सवदर्शनेन श्रुत्याऽऽगमानां श्रवणेन्द्रियाणाम् ।
साफल्यमापुः शतजन्मनां च धन्याः प्रणामैर्गुरुपादमूले ॥ २० ॥
दध्यन्न-सद्योघृत-दुग्धपूर्वं अभूत्सुतृप्तैः पुनरत्र सेव्यम् ।
प्रारब्धरूपं परिहर्तुमीष्टे जीवद्विमुक्तोऽपि न पुण्यभोगम् ॥ २१ ॥
निरन्तरं शास्त्रविचिन्तनेषु सन्तोषसंस्थापितमानसानाम् ।
दिनान्यविज्ञातगतीन्यतीयुः समाध्यवस्थामिव संश्रितानाम् ॥ २२ ॥
समाप्य पुण्योत्सवमेवमात्मगुरोः पुनः पूर्वगुरोस्तदन्ते ।
सद्ध्यानतीर्थस्य दिगन्तकीर्तेराराधनं चारभत व्रतीशः ॥ २३ ॥
स्वस्मिन्हरिं प्रीततरं पुनःस्वं भक्तं हरौ भक्ततरं व्यधित्सत् ।
प्रीतौ च भक्तौ खलु तृप्त्यभावो वायोश्च तद्वंशभुवां स्वभावः ॥ २४ ॥
संवर्णयन्न्यायसुधां स नित्यं वाक्यार्थसच्चन्द्रिकया समेताम् ।
विसंशयं हंसवरो बुधाग्र्यान् व्यधत्त सौख्याम्बुधिसन्निमग्नान् ॥ २५ ॥
पुरा कदाप्यश्रुतशास्त्रभागान् श्रुत्वाऽश्रमं साध्वमुनोच्यमानान् ।
बुधा अबोधन्निह हेतुमेकं सत्प्रज्ञयोगीन्द्रकृपाप्रपाकम् ॥ २६ ॥
मेयानुवादेन तदा बुधानां मोदावलीदायि समन्वतिष्ठत् ।
न्यायामृताद्यैः सततोपजीव्यवादावलीवाङ्मुखमङ्गलं सः ॥ २७ ॥
शुश्राव सद्ध्यानगुरोश्चरित्रं गुरूत्तमो मन्दधिया निबद्धम् ।
शुक्तौ स्थितोऽयं त्विति नैव सन्तो मुक्तामणिं जातु परित्यजन्ति ॥ २८ ॥

---

१. एतद्ग्रन्थकृता विरचितम् ।

सद्ध्यानतीर्थः प्रवचोरतोऽभूत् संपूर्य नित्यं निजकृत्यजातम् ।
न त्वेव संकोच्य तदित्यवादीच्चरित्रतत्वं स गुरूत्तमस्य[1] ॥ २९ ॥
अशोधयत्तद्विजयाख्यकाव्यं निरस्य तत्तत्पदवाक्यदोषान् ।
प्रवेश्य च स्वस्य सुपावनोक्ती रथ्याजलं गाङ्ग इवामलौघः ॥ ३० ॥
स ज्ञानयज्ञं पुर आतकूरे प्रारब्धुमैच्छत्परहंसवर्यः ।
जानन्निमां वै निजपूर्वजानां संसिद्धिभूमिं कृतसाधनानाम् ॥ ३१ ॥
पूर्वाश्रमे ध्यानमुनिः सुधाऽऽद्यं पुरा पुरेऽत्रैव चिराय भक्त्या ।
धराऽमरेभ्यो हि विरामहीनो जरामरघ्नं समुपादिदेश ॥ ३२ ॥
अत्रैव पूर्वं च स सज्ज्ञतीर्थः पूर्वाश्रमस्थः परिशुद्धभक्त्या ।
नितान्तसन्तोषितसत्यधीराड्वेदान्तसाम्राज्यपतित्वमाप ॥ ३३ ॥
[2]सत्कामसद्धीरमुखाः प्रवेकाः वेदान्तराज्याधिपपूज्यतीर्थाः ।
श्रीमूलरामोऽखिलतीर्थपादः कृष्णा च तीर्थं सुखतीर्थशात्रम् ॥ ३४ ॥
इतीह तीर्थोत्तमसङ्घसङ्गमाङ्गल्यमन्वीक्ष्य तदाऽऽतकूरात् ।
सद्यः समुत्सृष्टनिजाभिमानो ह्रियेव दूरापगतः प्रयागः ॥ ३५ ॥
लोके प्रजानां परिरक्षितारः षष्ठांशभागं हि नृपा लभन्ते ।
पात्रं तु पुण्यस्य हि धर्मसम्राट् शिष्यार्जितादष्टगुणस्य चित्रम् ॥ ३६ ॥

---

१. सत्यध्यानविजये काव्यकृता 'संकोच्यायं निखिलं कर्मजातं स्वाध्यायादौ निरतः सर्वदाऽऽसीत्' इति श्लोको निबद्ध आसीत् । तत् 'संकोच्य' इति पदं न योग्यं, कृत्यानां संकोचकरणाभावात् किन्तु संपूर्येत्येव तत्स्थाने पदं निवेशनीयमित्याज्ञाप्य तं श्लोकं 'संपूर्यायं निखिलं कर्मजातं' इत्येवं समशोधयदिति भावः । २. श्लोकद्वयेन आतकूरक्षेत्रस्य सभासमये प्रयागादत्युत्तमत्वं उत्प्रेक्षामुखेनाह सत्कामेति ।

शुभानमन्यन्त बुधाः स्वलब्धान्प्रसादजन्यान्गुरुदेवतानाम् ।
स्वपापजन्यानशुभांस्तु नित्यमेवं हि विद्या सफला प्रसिद्धा[1] ॥ ३७ ॥
संस्थापितं मूलधनं क्वचिच्च भवेद्धि निर्मूलमथाल्पवृद्ध्यै ।
समर्पितं त्वत्र गुरौ बुधाग्र्यैः स्वल्पं च पुण्यं समभूदगण्यन् ॥ ३८ ॥
महोत्सवं तं भुवि कान्तकान्तं स्मरन्त एवाथ निरन्तरं ते ।
सन्तो ययुर्हन्त गृहांस्तनूभिस्तत्रैव किन्तु न्यवसन्मनोभिः ॥ ३९ ॥
तदा तदा रामपदाब्जमर्चन् सदा हृदा न्यायसुधां वदंश्च ।
यदा कदाऽप्यन्यविधानशून्यो मुदा वदान्योऽवसदत्र धन्यः ॥ ४० ॥
प्रत्यग्रजामातृभिरप्यमीभिर्वधूगृहे जातु नलब्धपूर्वैः ।
द्विजान्स पानाशनवस्त्रवित्तैरमानयद्दर्शितबन्धुकृत्यः ॥ ४१ ॥
स तर्कसत्ताण्डवपाठकाले समर्थयामास निसर्गभूताम् ।
वाक्यार्थभूतान्वयबोधशक्तिं शब्दस्य[2] तेनैव तथाऽऽत्मनश्च ॥ ४२ ॥
यदृच्छया वीक्ष्य बुधाग्र्यमेकं नद्यां स्ववस्त्रं परिशोधयन्तम् ।
न्ययुंक्त नित्यं स तदर्थभृत्यं अहोऽवदातो बुधपक्षपातः ॥ ४३ ॥
विरोधिविच्छित्ति-निजागमोक्ति-श्रीरामपूजा-ऽन्नधनादिदानैः ।
स्थाने स एवालभतात्र यज्ञे मुख्यं फलं भीम इवाश्वमेघे ॥ ४४ ॥
या योगवृत्तिर्विदुषां च रूढिः पदस्य विष्णूत्तरपूर्वकस्य[3] ।
समर्थयामास गुरुःश्रितस्तां नारायणत्वं सुगुणायनस्य ॥ ४५ ॥

---

१. अनेन 'शुभान्ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् । इतरानात्मपापोत्थान् तेषां विद्या फलिष्यति' इति प्रमाणं सूचयति ।

२. शब्दस्य निसर्गभूतामन्वितामिधानशक्तिं तथा तेनैव स्वस्यापि नैसर्गिकीं शिष्यान् प्रति वाक्यार्थबोधनशक्तिं च प्रकाशयामास । ३. अग्रिमपृष्ठे.

इति यतिकुलपालो ध्वस्तदुर्वादजालः
रघुपतिपदलोलः शास्त्रभावोक्तिशीलः ।
मधुरगुणविशालो मायिनां चित्तशूलः
जयति सदनुकूलः स्वामिसत्प्रज्ञबालः ॥ ४६ ॥

महोत्साहः पाठेऽनवरतमनीहश्चलसुखे-
ष्वसन्देहस्तत्वे समपगतमोहः खलमते ।
प्रवाहः पुण्यानामपर इव देहः सुतपसां
सतामुन्नाहोऽयं जयति सदभिज्ञो गुरुवरः ॥ ४७ ॥

समूहः शुद्धीनां नवनवमहः शिष्यमनसां
दृढस्नेहो रामेऽन्वहमवगाहः शुचिजले ।
अपोहः पापानां सुकृतनिवहः साधुमनसा-
मभीष्टानां दोहो जयति सदभिज्ञो गुरुवरः ॥४८॥

इत्येवं पुण्यनामा गुरुचरणसमाराधनं पूरयित्वा ।
तन्मुख्याङ्ग प्रसङ्गात्परिषदमपि तां मध्वसिद्धान्तवृद्धिम् ॥
कृष्णायाः पुण्यतीरे गुरुचरणरजोवातपूतातिकूरे ।
चातुर्मास्यं चचार व्रतमपि यतिराट् रंगनाथप्रसत्त्यै ॥ ४९ ॥

॥ इति श्रीसत्याभिज्ञविजये रङ्गाङ्के द्वितीयः सर्गः ॥

---

३. विष्णूत्तरपूर्वकस्य, विष्णोः परतरत्वप्रतिपादनपरस्य, पदस्य, नारायणपदस्य, योगरूढिवृत्तिमाश्रित्य नाराणां सुगुणानामयन इति विग्रहेण अभिनवचन्द्रिकोक्तरीत्या नकारस्य णत्वं समर्थयामास । तथा विष्ण्वाख्योत्तरपदपूर्वकस्य पदस्य उत्तरादिमठाधिपत्यरूपपदस्य या योगवृत्तिः योगिनां 'विष्णोः सर्वोत्तमत्वं तु सर्वदा प्रतिपादय' इति विहिता वृत्तिस्तां स्वपूर्वजानां विदुषां परंपरागतां रूढिं च आश्रितो गुणपरिपूर्णो नारायण एवेति समर्थयामास ।

॥ श्री ॥

अथ तृतीयः सर्गः

श्रीविष्णुनामगणमध्यगतोत्तराख्य-
हंसस्वरूपभगवान् यत आदिरस्य ।
नाम्नोत्तरादिरिति तेन मठोत्तमोऽयं
राराजतेऽखिलमठेषु सदा प्रधानः ॥ १ ॥

ब्रह्मा च वायुरपि चोत्तरशब्दवाच्यौ
आदी उभाविह मठाधिपती अभूताम् ।
श्रीमूलराम इह चोत्तरशब्दवाच्यो
ह्यस्त्यादितो गुरुपरम्परयार्चिताङ्घ्रिः ॥ २ ॥

पक्षेषु चापि निखिलेष्वथवोत्तरस्य
मध्वागमस्य रिपुदुर्मतखण्डनेन ।
संस्थापने सततमादिरयं प्रधान-
स्तेनाप्ययं हि विदितो मठ उत्तरादिः ॥ ३ ॥

तेनोत्तरादिमठपीठमधिष्ठितानां
शास्त्रोपदेशनविधौ विनियोजितानाम् ।
वंशव्रतौ रघुपतेः पदपूजनं च
श्रेयोऽर्थमाश्रितजनस्य दिशां जयश्च ॥ ४ ॥

---

१. अत्र सर्गे श्रीगुरूत्तमस्य दक्षिणदिग्विजयो निरूप्यते । आदौ श्रीमदुत्तरादि-मठस्य प्राधान्यं निरूपयति त्रिभिः श्लोकैः । वसन्ततिलकावृत्तम् ।

सत्प्रज्ञतीर्थचरणाम्बुजभृङ्गवृत्तिः
वेदान्तराज्यपरिपालनचक्रवर्ती ।
प्रातिष्ठताथ धृतदिग्जयसंप्रवृत्तिः
वीरोऽद्रिगह्वरविनिर्गतसिंहवृत्तिः ॥ ५ ॥

हिंसोज्झिताः परमहंसकुलावतंसाः
प्रध्वंसयन्ति कुमतानि दिशां जयेषु ।
संसारदुःखशमनाय सतां तथा हि
हिंसत्यरीन्हरिरपि स्वजनाभिवृद्ध्यै ॥ ६ ॥

काले तदा कलिबलातिशयादयोग्य-
सम्पर्कशङ्कितधियोऽखिलतीर्थपालाः ।
श्रीराममेत्य दिविजाः किल तीर्थपादं
संप्रार्थयन्त सदभिज्ञकरार्चिताङ्घ्रिम् ॥ ७ ॥

सत्तीर्थपाद भगवन् स्वयमेत्य तावत्
दुःसङ्गदोषकलुषा न भवेम यावत् ।
स्थानानि नः करुणयाऽनुगृहाण तूर्णं
पावित्र्यहानिविपदः परिपालयेति ॥ ८ ॥

संप्रार्थितो दिविभवैरिति रामदेवः
स्वानां मनोरथमिमं परिपूरयिष्यन् ।
सम्प्रैरयत्स्वपदपूजकमाशु तीर्थ-
क्षेत्रस्थलप्रचुरदक्षिणदिक्प्रयाणे ॥ ९ ॥

आज्ञां हरेर्गुरुवरः शिरसा दधानः
प्राज्ञो व्रजन् सह निजैस्त्वरितप्रयाणः ।

अध्वस्थितांश्चरणरेणुकणैः पुनानः
पद्मावतीपदभुवं गुरुराप धन्यः ॥ १० ॥

श्रीपीठपूर्वपदविश्रुतगोनिकाये
रामार्चनान्नियमतः पुर एव सेव्ये ।
सुश्रीकरे गुरुरमज्जदिह स्वशिष्यै-
स्तीर्थे सुधाभिध इवात्र सरोवरे सः ॥ ११ ॥

सीताऽत्र रामदयिता गुरुपूजितैषा
पद्मावती च किल वेदवती पुरा सा ।
एते समेत्य मुदयाऽस्मरतां पवित्रं
त्रेतायुगस्थमितरेतरसख्यवृत्तम् ॥ १२ ॥

स्वस्याः कृते जनकजाऽस्मरदत्र पूर्वं
पद्मावतीकृतमशोकवने निवासम् ।
सा चानयाऽऽत्मपतये स्वविवाहहेतोः
याञ्चां कृतां स्मृतवती ननु ते कृतज्ञे ॥ १३ ॥

रामानुजीयमतसाधनबद्धलोभाः
सद्ध्यानसिंहविजिता बहुधा बुधेभाः ।
पौत्रेण तस्य सदभिज्ञमुनीश्वरेण
चक्रुः कथां पुनरिह प्रतिकर्तुकामाः ॥ १४ ॥

---

१. श्रियः पीठं पद्मम् । गोनिकाये जलसञ्चये पद्मसरोवरे । सुधाग्रन्थोऽपि 'श्रियः पत्ये' इत्यादित्वात् श्रीपूर्वपदवाक्यनिकायः श्रीकरः रामार्चनात्पूर्वं पाठ्यश्च ।

एकोऽपि सन् स सुबहून्नवचक्रवर्ती
प्रक्षोभमापयदिमान् परिशुद्धकीर्तिः ।
तत्साध्यमानविषयातिविरुद्धवृत्तीः
संदर्शयन् सपदि तन्मतपूर्वजोक्तीः ॥ १५ ॥
आजानजं कथककौशलमस्य वीक्ष्य
ते जातकौतुकवशास्तममुं परीक्ष्य ।
श्रीजानकीपतिपदार्चनसद्व्रतस्य
पूजाममुष्य विदधुः स्तुतिभिः शुभस्य ॥१६॥
स्वामिन्निदं स्वमतसाधनसाधुकर्म
मन्यामहे भवदलंकृतवंशधर्मम् ।
सद्यः समीक्ष्य तव वादकथाप्रणालीं
सद्ध्यानतीर्थबुधकेसरिणं स्मरामः ॥ १७ ॥
तत्क्षेत्रमेतदथ सा खलु वादभूमिः
सा वेदिका च तव पूर्वगुरुश्रितेयम् ।
सा च स्थिरा स्वमतसाधनदक्षदीक्षा
सा वादपद्धतिरियं च गुरो तवेति ॥ १८ ॥
गोविन्दराजपदपत्तनमेयिवांसं
स्वानन्दतीर्थवरवंशसुशोभिहंसम् ।
एनं दिदृक्षुरभिवृद्धमनोनुरागः
सानन्दमागमदपारमहाजनौघः ॥ १९ ॥
प्राप्तं पुरान्तिकमथो गुरुसार्वभौमं
तत्रत्यदेवगृहकृत्यनियुक्तवर्गः ।

श्रेष्ठोत्तरादिममठोचितगौरवेण
प्रत्युज्जगाम परिपालितसंप्रदायः ॥ २० ॥

भेरीमृदङ्गपणवानकतूर्यघोषैः
पारायणात्मकगिरामपि संप्रकर्षैः ।
आरात्प्रपूरितनभोविवरप्रदेशैः
पौरा धराऽमरवरा गुरुमभ्युपेयुः ॥ २१ ॥

कुम्भीन्द्रपीठमधिरुह्य तदा यतीन्द्रो
गम्भीरमन्दगमनो गुरुभक्तिसान्द्रः ।
सम्भासितं बहुविधं कदलीक्षुपूर्ण-
कुम्भादिभिः पुरवरं प्रविवेश मान्यः ॥२२॥

कान्ते स्रगावलिलसद्द्विरदेन्द्रकुम्भो-
पान्ते तदा स्वपुरतः स सुधां निधाय ।
तं तं च मानमखिलं जययोगिपाद-
प्रान्तेऽर्पयन् प्रतिपदं गुरुरुल्ललास ॥ २३ ॥

नारीजनैः स रचितैः कुसुमप्रवर्षै-
र्नीराजनैः प्रतिगृहं च शुभप्रकाशैः ।
आराधितोऽयमिति राजपथेषु गच्छन्
रराजते स्म नितरां निगमाधिराजः ॥ २४ ॥

अत्युत्तमः सुरवरायतनोपकण्ठ-
रथ्यामितोऽपि गजवाहनयानपूर्वाम् ।
तत्रापि सत्कृतिमवाप परंपराऽऽप्तां
कुत्रापि या न सुलभाऽन्यमठाधिपानाम् ॥२५॥

सौवैरयं परिवृतः क्षितिदेववर्यै-
देवालयान्समुपसाद्य च तत्र तत्र ।
देवं नमन्नवनिजायुतरामचन्द्रं
सेवां व्यधत्त धनराशिसमर्पणाद्यैः ॥ २६ ॥

शेषाभिधं गिरिमथो गुरुरारुरोहा-
[1]शेषाभिधं रघुपतिं स्वभुजे दधानः ।
भारेण तं गुरुमसौ गिरिमागमार्थ-
सारानिशप्रवचनेन गुरूत्तमाख्यः ॥ २७ ॥

मन्दा वदन्त्यचलमद्रिमथो [2]अमन्दा
द्वन्द्वाविचाल्यममुमेव पुनर्यतीन्द्रम् ।
इन्द्रोऽच्छिनत्स गिरिपक्षममुष्य [3]पक्षं
वन्द्योऽवतीर्य तु स एव ररक्ष भिक्षुः[4] ॥ २८ ॥

शान्त्यादि सद्गुणगणैर्गुरुरुन्नतोऽद्रिं
तं तून्[5]नतं समधिरूढमधश्चकार ।
सन्धारयन् भुवमुतागमपालनेन
तं भूधरं [6]सुबहुधाऽप्यधरीचकार ॥ २९ ॥

---

१. अशेषाभिधम् । 'नामानि सर्वाणि' इति श्रुतेः गिरिर्भारमात्रेण गुरुः । अयं तु प्रवचनेन गुरूत्तमः ।

२. अमन्दा विद्वांसः शीतोष्णादिद्वन्द्वैरविचाल्यममुमेवाचलपदेन व्यवहरन्ति ।

३. पक्षं श्रीमध्वसिद्धान्तम् । ४. भिक्षुः श्रीजयतीर्थः ।

५. उन्नतं परिमाणमात्रेण । ६. सुबहुधा आरोहणेन गुणोन्नतत्वादिमहिम्ना च ।

स्वामीतिपूर्वपदशोभितपुष्करिण्यां[1]
स्नात्वा गुरुः सह निजैः सुचिरं न्यमज्जत् ।
मुक्तस्तदन्यजगतश्च सदैव विष्णुः
स्वामीत्यपूर्वनयशोभितसत्सुधायाम् ॥ ३० ॥

संसेवितं गुरुवरो धरया वराहं
संशोभितं सह धरासुतया च रामम् ।
संप्राप्तमत्र च धरां गिरिवेङ्कटेशं
संमोदमापदभिवन्द्य समागतांस्त्रीन् ॥ ३१ ॥

पद्मावतीप्रियपतेरतिचारुपाद-
पद्म[2]स्रुतामृतरसान् प्रपिबन् रसज्ञः ।
पद्माभ-निर्गतनिमेष-दृगञ्जलिभ्यां
पद्मासनान्वयज आस सुखाब्धिमग्नः ॥ ३२ ॥

भूरु[3]द्धृतिं [4]कमलजाऽऽत्मविवाहहेतो-
र्वैकुण्ठतः सपरिवारमिहोपयानम् ।
रक्षोवधं च स्वकृतेऽ[5]वनिजेति तिस्रोऽ-
प्यन्योन्यमात्मदयितोपकृतिं शशंसुः ॥ ३३ ॥

---

१. स्वामिपुष्करिण्यां स्नात्वा विष्णोः मुक्तामुक्तजगत्स्वामित्वसाधकापूर्वयुक्ति-विलसितां न्यायसुधां सुचिरं निजेभ्यः प्रावोचत् ।

२. पादपद्माभ्यां आ समन्तात् स्रुतं अमृतम् । कमलदृशो अनिमिषे चक्षुषी एव अञ्जली ताभ्याम् । पद्मासनस्य चतुर्मुखस्य वंशे जातः ।

३. उद्धृतिं रसातलात् । ४. कमलजा पद्मावती । ५. अवनिजा सीता ।

श्रीवेङ्कटाचलपतेरलिकान्तरे स
संवीक्ष्य चारुतिलकं परभागमासम् ।
सत्यज्ञतीर्थचरितस्य समस्मरद् द्राक्
यत्प्रार्थितोऽधृत हरिस्तिलकं किल प्राक्[1] ॥ ३४ ॥

संमानितोऽर्चकजनैः त यथाविधानं
निर्माल्यपीतरुचिरांबरदानपूर्वम् ।
ब्रह्मोत्सवं परमनम्रमनाः स धर्म-
सम्राड् व्यधत्त बहुवित्तसमर्पणेन ॥ ३५ ॥

धान्यादिसंग्रहनिरोधकशासनेषु
सत्स्वेव तान्यविगणय्य स धीरचित्तः ।
यत्नोपसादितयथेप्सितशालिराशि-
श्चक्रेऽन्नकूटसुमहोत्सवमत्र भक्त्या ॥ ३६ ॥

दासर्षभं कुरु विभो वृषभाद्रिवास
मामाञ्जनेयदयितं कुरु तन्नगेश[2] ।
शेषाद्रिभूष कुरु मां तव दास्यभूषं
पापं दहेति गुरुरस्तुत वेङ्कटेशम् ॥ ३७ ॥

सन्यस्तसर्वविभवादवधूतवृत्ते–
रप्यात्मक्लृप्तधनमाददु एव देवः ।

---

१. यावत् सत्यज्ञानतीर्थायार्चकैरन्तः प्रवेशो न दत्तस्तावद्वेङ्कटेशेन तिलको नैव धृतः । तदनन्तरमेव धृत इति कथा ।

२. तन्नगेश आञ्जनेय पर्वतेश ।

लक्ष्मीप्रियस्य ननु सा हि कृपा यतीशे[1]
तस्मा अदाद्धि तदभीष्टविरक्तिलक्ष्मीम् ॥३८॥

स स्वैरसेवत सुवर्णमुखीं[2] च गां तां
त्याज्यं तु या कलुषमात्मपदाश्रितानाम् ।
भित्वा हि तान् सुखसुवर्णयुतान् करोति
ज्ञप्तिं ददाति ह गुरोरुपदेशकस्य ॥ ३९ ॥

क्षेत्रं च तीर्थमथवाऽसमतीत्य यद्यत्
अग्रे ययौ समुपगृह्य स मूलरामम् ।
अंशेन तत्तदभिमानिसुरास्तदैनं
भृङ्गा इवाम्बुजकरं तृषयाऽन्वगच्छन्[3] ॥ ४०॥

---

१. लक्ष्मीप्रियः स्वप्रियं धनं तस्मादादाय तत्प्रियं वैराग्यं तस्मै ददौ । सा हि कृपा ।

२. सुवर्णमुखीं गां तन्नामकनदीजलम् । मुखे शास्त्राक्षररूपशोभनवर्णयुतान् शास्त्राध्ययनरतान् । तीर्थस्नानं हेयं कलुषं विनाश्य उपदेशकसमागमं संपाद्य शास्त्राभ्यासतत्परान् करोति । यद्वा शोभना वर्णाः सत्याभिज्ञे-त्येवंरूपा मुखानि पादानां आद्याक्षराणि यस्यास्तां गां वाक्यं एनं श्लोकं ये सेवन्ते, आत्मपदाश्रितानां श्लोकगतपादचतुष्टयं चिन्तयतां तेषां पापं विनाश्य तान् मुखे शोभनाक्षरयुतान् करोति, तेषां उपदेशकस्य सत्या-भिज्ञगुरोर्ज्ञप्तिं च ददाति । तद्विषयकस्मृतिं जनयत्ययं श्लोक इति ध्वनिः ।

३. तीर्थक्षेत्राभिमानिसुरा मूलरामदर्शनामृतकांक्षया गुरुं, पद्महस्तपुरुषं भृङ्गा इवान्वगच्छन् ।

ग्रामाञ्छुभांस्तु चरतो निरपेक्षवृत्ते-
मध्ये स्थितं कमपि वा परिहृत्य यानम् ।
तस्याशुभत्वविषयेऽपि बभूव लिङ्गं
दोषो न वैयधिकरण्यमपीति चात्र ॥ ४१ ॥

याम्यां चरन् दिशमसौ यमिनां प्रबर्हः
ग्रामं क्षमाविबुधमण्डितमण्डकोलम् ।
धीमान् सुधाप्रवचने परमानुकूलं
प्रेम्णाऽध्युवास सुचिरं प्रवचोनिमग्नः ॥ ४२ ॥

यद्विप्लुषं समुपजीव्य पदे पदेऽलं
स्वान्व्यासराट्प्रभृतयो विदधुः प्रबन्धान् ।
नास्ति क्वचिच्च यदनुक्तमिह प्रमेयं
तां श्रीसुधामुपदिदेश स धन्यधन्यः ॥ ४३ ॥

तस्याश्च मङ्गलमहोत्सवसुप्रसङ्गे
स्वादिष्टतद्रसमनूद्य स धर्मसम्राट् ।
आतृप्त्यपाययदशेषबुधप्रजाः स्वाः
नैकोऽश्नुते हि मधुरं नृपतिर्दयालुः ॥ ४४ ॥

---

१. शुभांस्तु शुभानेव । कमपि ग्रामम् । विमतो ग्रामः, अशुभः, मध्यस्थितमपि तं परिहृत्य गुरोर्गमनात् इति लिङ्गम् । गुरुवृत्तिगमनं ग्रामवृत्त्यशुभत्वस्य साधकम् । सत्यां व्याप्तौ वैयधिकरण्यं न दोष, इत्यस्यापि इदं ज्ञापकमभूत् ।

२. 'नानादुर्मतखण्डनेऽद्भुतसुधाविप्लुट्शरण्या इमे' इति अभियुक्तवचनम् । अत एव 'अनुक्तकथनात्' इत्यत्र कण्ठतोऽनुक्तस्येत्येवार्थः ।

नाचारदेवसदनाख्यपुरीं स धीमा
नाचारशुद्धिविभवः समवाप्य तत्र ।
श्रीसत्यनाथचरणस्मरणैकतान-
सत्याभिनूतनगुरूत्तममेवमस्तौत्[1] ॥ ५० ॥

को वा वदेत्तव गुरोस्त्वयि सुप्रसादं
यस्त्वामुवाच किल मोक्षपदं यियासुः ।
त्यक्त्वाऽपि बन्धमखिलं न खलु त्यजेयं
स्नेहानुबन्धमयि वत्स सदा त्वयीति ॥ ५१ ॥

श्रीचन्द्रिकामथ गदाऽमृतताण्डवानि
कृत्वाऽपितान्यभिनवान्यवितृप्तचित्तः ।
त्वां पञ्चमं गुरुवरोऽभिनवं चकार
धन्यस्त्वदन्य इह कोऽस्ति मुनीश्वरेति ॥ ५२ ॥

रामाभिधस्य गृहिणोऽत्र गृहे गृहिण्याः
रोगं स विभ्रममयं चिरदुश्चिकित्सम् ।
संशान्तिमापयदनुग्रहदृष्टिमात्रात्
संसाररोगभिषजोऽत्र किमत्र चित्रम् ॥ ५३ ॥

तिन्नलूपुरे स्वमठवेश्म सुदीर्घकालं
अन्यायतोऽन्यवशगं निजयोगदृष्ट्या ।
तत्रत्यभूगतशिलाऽक्षरदर्शनेन
प्रत्याय्य सर्वजनतां स वशीचकार ॥ ५४ ॥

---

१. नाचारगुडीपुरे सत्याभिनवतीर्थमस्तौत् ।

एवं श्रीहरिपादसङ्गशुचिभिर्गोसंप्रवाहैः स्वकैः
 सौवान् पावनतां नयन् बहुविधैर्भोज्यादिभिः पोषयन् ।
कावेरीसलिलौघवद् गुरुवरः सद्भुक्तिमुक्तिप्रदः
 श्रीरंगं गतवान्न्यधात्स्वहृदये श्रीरङ्गनाथं प्रभुम्[1] ॥ ५५ ॥

॥ इति श्रीसत्यामिज्ञविजये रङ्गाङ्के तृतीयः सर्गः ॥

॥ श्रीः ॥

अथ चतुर्थः सर्गः

श्रीधरामृदुकराग्रसेवितं नाभिजन्मचतुराननस्तुतम् ।
नागराजमृदुभोगतल्पगं रंगनाथमिह संननाम सः[2] ॥ १ ॥

मूलदिग्विजयरामसंयुता रंगनाथनिलयं समागता ।
योगनिद्रितमबोधयत्तथा स्निग्धनर्मवचनैः क्षितेः सुता ॥ २ ॥

[3]उत्तिष्ठ प्रलयो गतोऽथ दयिते कृत्यं प्रबुद्धस्य किं
 हत्वा शत्रुगणाञ्शरैर्जय दिशः स्तस्तेऽत्र रामा उभौ ।
सुप्तिस्ते सुखचित्तनोः क्व तत एवात्मानमालिंगितो
 हित्वा त्वामिति भूमिजां विजितवान् प्राज्ञो हि रंगेश्वरः ॥ ३ ॥

---

१. श्रीहरिमाहात्म्यवर्णनपरैर्निरन्तरोपदेशैः नैवेद्यशेषैश्च सतां भुक्तिमुक्तिप्रदः । कावेरी स्नानेन मुक्तिं सस्यसमृद्धिभिश्च भुक्तिं ददाति । 'कावेरीचोलभूमाता भुक्तिमुक्तिकरी' इति तीर्थप्रबन्धे । श्रीरङ्गक्षेत्रस्योभयपार्श्वयोः प्रवहन्ती श्रीरङ्गनाथं स्वहृदये निदधाति च । (शार्दूलविक्रीडितम्)

२. (रथोद्धतावृत्तम्) ३. अग्रिमपृष्ठ

योग एष तव नाज्ञलोकवन्निद्रितस्त्वमिति भावितोऽमुना[1] ।
योगिनं च तमनिद्रमातनोद्भावनानुगफलप्रदो हि सः ॥ ४ ॥
स्मारयन्प्रलयवर्तिनीं चितां[3] स्वोदरे नियतनिष्क्रियस्थितिम् ।
पारतन्त्र्यमनुमानमात्मतो भेदसाधकमसौ न्यदर्शयत् ॥ ५ ॥
जातु देवतटिनी कवेरजां यात्युतागमकथास्थले पुनः ।
प्रीतितोऽनिशमुपास्थितेति तत्पूतता जगति किं नु वर्ण्यते ॥६॥
प्रार्थयद्धि स कवेरकन्यकां नित्यमात्महृदये हरेः स्थितिम् ।
चन्द्रपुष्करवतीं गुरूत्तमो रामचन्द्रपदपुष्करे रतिम् ॥ ७ ॥
कुम्भघोणमुपगम्य संभ्रमाच्छार्ङ्गपाणिचरणाम्बुजं[4] नमन् ।
तेन गूहितमधः स्थितं धनुर्वीक्ष्य हन्त कविरित्यचिन्तयन् ॥ ८ ॥
पूर्णशक्तिजलधे रिपुक्षतौ नैव मेऽस्ति धनुषा प्रयोजनम् ।
ज्ञापयन् स्वनिरपेक्षतामिति स्वं धनुः स कृतवानधःस्थितम् ॥ ९ ॥
नूनमस्य धनुषोऽभिमानिनीं गूहयेत्खलजने सरस्वतीम् ।
चत्वरेषु न खलु प्रकाशयेत्तत्त्वमेतदिति सत्स्ववेदयत् ॥ १० ॥

---

३. प्रलयो गतः उत्तिष्ठेति सीता। प्रबुद्धस्य मम किं कृत्यं इति रङ्गेश्वरः । शरैः शत्रुगणान् हत्वा दिशो जयेति सीता । अत्र विषये ते उभौ मूलदिग्विजयरामौ स्तः इति रङ्गेश्वरः । सुखचित्तनोः ते क्व सुप्तिरिति सीता । तत एव सुप्त्यभावादेव त्वां हित्वा आत्मानमालिङ्गितः इति रङ्गेश्वरः । प्राज्ञनानकपरमात्मनः आलिङ्गनस्यैव निद्रारूपत्वात् स्वरमणस्य मम स्वालिङ्गनमेव निद्रेत्युक्त्वा विजितवान् । (शार्दूलविक्रीडितम्)

१. अमुना श्रीसत्याभिज्ञतीर्थेन । २. अनिद्रं अज्ञानरहितम् ।

३. चितां चेतनानाम् । निष्क्रियत्वात् पारतन्त्र्यं ततो हेतोः स्वतन्त्रादात्मनो रङ्गनाथाद्भेदः । ४. 'शार्ङ्गं चैव सरस्वतीम्' ॐ अनाविष्कुर्वन् यात् इत्युक्तेः ।

आयुधं स्वमतमप्रदर्शयन् खण्डयेत्कुमतिनो हि तन्नयैः ।
सज्जना हि कथया वितण्डयेत्येवमध्यगमयत्कथास्थितिम् ॥ ११ ॥

न्यासिनां खलु विपक्षदण्डने भाष्यसंज्ञितमदण्डधारिणाम् ।
सौख्यतीर्थरचितं धनुर्मतं नैव लौकिकमिति ह्यदर्शयत् ॥ १२ ॥

श्रीजयार्यकृततत्वकाशिकामङ्गलं गुरुवरोऽकरोदिह ।
पालयन्सततमङ्गलात्मिकां उत्तरादिमठगां परम्पराम् ॥ १३ ॥

श्रीजयार्यसुकृतेः पयोनिधेः संभृतं स सदभिज्ञवारिदः ।
सन्ततानुवचनोरुधारया संववर्ष परमागमामृतम् ॥ १४ ॥

एवमीदृशसुवृष्टिसम्भवं तत्वरूपममृताम्बुसंप्लवम् ।
कुम्भघोणबुधकुम्भमण्डलं संग्रहीतुमभवन्नहि क्षमम् ॥ १५ ॥

मज्जनैःस्वसलिले परःशतैः सन्तुतोष न तथा कवेरजा ।
दैशिकाऽऽस्यकमलोद्भवे सकृत्स्नानतः प्रवचनामृते यथा ॥१६॥

अत्र योगिपतिरस्मरच्च सद्ध्यानतीर्थगुरुणा प्रवर्तिताम् ।
ध्वस्तसर्वपरवादिदुर्मदां क्षेत्रतज्ज्ञविषयां पुरा कथाम् ॥ १७ ॥

प्राप्य वेलपुरमुत्तरादिराड् विप्रपूर्णमुत दुर्गशोभितम् ।
दुर्गमात्ममहिमोपशोभितं प्राणमत्सदधिराजदेशिकम् ॥ १८ ॥

यो यियासुरमरापगां तया भीमरथ्युदकदृश्यदेहया ।
स्वात्मनैत्य दयया निवारितः शास्त्रतीर्थबहुमानपूर्णया ॥ १९ ॥

---

१. अत्र कुम्भघोणे । २. क्षेत्रतज्ज्ञविषयां क्षेत्रक्षेत्रज्ञविषयाम् ।

मौनपूर्वमधुरामुपागतो[1] मौनिपूर्वमुपगम्य सत्प्रियम् ।
मानपूर्वमतराज्यपालको मानपूर्वमतिराननाम सः ॥ २० ॥
सत्यबोधगुरुनित्यपूजितं सत्प्रियं स गुरुरभ्ययाचत ।
सत्यशब्दितरघूत्तमस्य मां सुप्रियं हि परमाप्त कुर्विति ॥ २१ ॥
रामपूर्वपदमीश्वराभिधं क्षेत्रमेत्य तदधिष्ठितं यतिः ।
रामनामजपलीनमानमत् प्रेमपूर्वकमुमामनोहरम् ॥ २२ ॥
दैवमस्य जगतो रमापतिः किंकराश्च विधिशङ्करादयः ।
स्थापयन्तमिति सन्मतं शिवोऽवर्षदात्मकरुणामयेक्षणैः ॥ २३ ॥
स्वीयपाशुपतशास्त्रनिन्दके प्रेमवानभवदीश्वरो यतौ ।
तत्तथैव हि यतोऽयमस्त्यहन्तत्वमान्यपि सदाऽनहंकृतिः[2] ॥२४॥
[3]चक्रवर्तिनि निरस्तमन्मथे गौरवेण धृतभिक्षुसद्व्रते ।
तोषमाप परमं शिवो यतौ को न तुष्यति समानधर्मणि ॥२५॥
राघवेण किल सेतुबन्धने विघ्नराजमिह सम्प्रतिष्ठितम् ।
बन्धसन्तरणसेतुराघवे विघ्नहीनरतिमभ्ययाचत ॥ २६ ॥
रामचन्द्रपदपूजकेन ते पूजिता जलधिगा नवग्रहाः ।
तस्य वै तदनुयायिनां तथा प्रत्यजानत सदाऽनुकूलताम् ॥२७॥
भूमिजामथ स दर्भशायिने दर्शयंस्तमयमित्ययाचत ।
[4]चिन्तयाऽलमियमस्ति ते प्रिया चिन्तयालमधुना मम प्रियम् ॥२८॥

---

१. मानपूर्वमधुरां मानामधुराम् । मानपूर्वं मतं प्रमाणसिद्धं मध्वमतम् । बहुमानपूर्वमतिः । मौनिषु प्रथमम् । २. अहङ्कारतत्वाभिमानिनोऽपि अहङ्काररहितस्य शिवस्य शैवमतनिन्दकेऽपि प्रेमवत्त्वं तथैव योग्यमेव ।
३. सः कैलासचक्रवर्ती अयं वेदान्तसाम्राज्यस्य । कामजयः भिक्षुव्रतं चाप्युभयोः । अतः समानधर्मत्वम् । ४. अग्रिमपृष्ठे.

ब्रह्महिंसनजघोरपातकाद्या पुनाति शिवमन्तिके स्थितम् ।
कोटिरग्र्यधनुषो हरेर्हि सा कोटितीर्थसुकृतातिशायिनी ॥२९॥

तत्र सेतुसलिले स्वकैः सह स्नानमेष विदधद्व्यचिन्तयत् ।
एवमेव विरजाऽवगाहनं तैः सहैव करवाण्यहं त्विति ॥ ३० ॥

नावमेष गुरुराट् कदाचन शिष्यवर्गसहितः समास्थितः ।
यावदाव्रजति तावदम्बुधिः क्षोभमाप परमं यदृच्छया ॥ ३१ ॥

प्रोच्चदीर्घपृथुरौद्रमूर्तयः संप्रसस्रुरधिवेलमूर्मयः ।
आगता उपरि नागलोकतो योद्धुमुद्यतफणा इवाहयः ॥ ३२ ॥

पातयन्सपदि तीरपादपान् घोरघोषमपि दिक्षु पूरयन् ।
स्मारयन्निव लयं भयानकः सर्वदिक्षु पवनो ववौ खरः ॥३३॥

ऊर्मिभिश्च पवनैश्च ताडिता नौरकम्पत सुदुर्दशां गता ।
दस्युभिर्नृपतिभिश्च पीडिता सात्विकी कलियुगे प्रजा यथा ॥३४॥

उन्नता क्षणमथापरक्षणे प्रापितावनतिरूर्मिवेगतः ।
नैव नौरलभत स्थिरां स्थितिं काम्यसिद्धिरिव दैवयोगतः ॥३५॥

वेपितामिति हि वातकोपतो नावमेवमवलोक्य तच्छ्रिताः ।
तत्रसुर्विकृतचेष्टितां जना अर्भका इव विरुग्णमातरम् ॥ ३६ ॥

कंपिते जलनिधौ तथा प्लवेऽप्यप्रकंपितमभूद्यतेर्मनः ।
तद्धि घोरभववारिधिप्लवं सुस्थिरं हरिपदं समाश्रितम् ॥३७॥

---

४. चिन्तया सीताविरहचिन्तया । सीतादर्शनेन तवोपकारकृतो मम प्रियं भक्तिवैराग्यादिदानरूपं चिन्तय ।

संसृतेः खरतराः षडूर्मयो हंसवर्यमवधूतसत्पथात् ।
कंपयन्ति न मनागपि प्रभुं किं पुनर्जलमयाः मृदूर्मयः ॥३८॥
यो हि युक्तिरभसैः कुवादिनां चाल्यते न पवनागमस्थिरः ।
तं स्वशक्तिरभसैः स्वनिष्ठितं चालयन्ति पवनागमाः कथम् ॥३९॥
कातरान्भययुजो निजानसौ व्येतु वो भयमिति प्रसांत्वयन् ।
स्कन्धसन्धृतरघूत्तमं हृदाऽवन्दताखिलविपत्तिवारकम् ॥ ४० ॥
प्रेरितः प्रभुरवूत्तमेन स प्रार्थयत्प्रवणधीः प्रचेतसम् ।
क्षोभशान्तिमथ सुप्रसन्नतां भावनम्रमृदुनर्मसूक्तिभिः ॥ ४१ ॥
एष तेऽहमयि देव किङ्करः सन्नमामि चरणावपां पते ।
विद्धि मां त्वदधिपस्य पूजकं राघवस्य मरुदन्वयोद्भवम् ॥ ४२ ॥
अत्र मूलरघुपस्य पेटिका वर्तते सदयितस्य मेंसके ।
नित्यमस्य दिविजैर्हि दर्शनं प्रार्थितं त्वमपि वेत्सि तत्तथा ॥४३॥
हंसनामपरमात्मजातसद्वंशवर्यधृतजन्मयोगिनाम् ।
संश्रितो हि हृदयेषु मध्वराट् तं समर्चयति मूलराघवम् ॥४४॥
सेतुबन्धसमये भवत्कृत-मार्गदापनविलम्बहेतुतः ।
तस्य दृष्टिविनिपातमात्रतः क्षोभितस्त्वमभवः किलाकुलः ॥४५॥
तस्य पूर्वशयनस्थलं भवांस्तत्पदप्रभवजाह्नवीपतिः ।
तस्य पश्चिमगदिक्प्रपालकस्तद्गुणापरिमितेर्निदर्शनम्[1] ॥ ४६ ॥

१. 'अयनं तस्य ताः पूर्वं' 'यच्छौचनिस्सृतसरित्प्रवरोदकेन' 'नैऋतो वरुणो मरुत्' 'अमितसज्ज्ञानसुखशक्तिपयोनिधि'रित्युक्तेः ।

सोऽयमेष तव नन्दिनीपतिर्बन्धुरेष[1] भगवन् समागतः ।
अर्चयेममममृताभिषेचनैर्नेदृशैः खरतरोर्मिपातनैः ॥ ४७ ॥

तत्प्रसीद भगवन्नपां पते स्निग्धता[2] तव निसर्गता मता ।
स्युस्तवेदृगुरुकोपभाजनं मायिनो न चरणानुयायिनः ॥ ४८ ॥

क्षान्तमन्तुरथ पूर्वशन्तनो शान्तिमापय निजां तनुं ततः ।
सन्तु ते पदयुगान्तिके हि नोऽनन्तसंप्रणतयः सुरेश्वर ॥४९॥

वाचमित्थमुपकर्ण्य योगिनः प्रीतिमाप परमां सुरेश्वरः ।
राघवाभिनुतिमुख्यतत्परा संस्तुतिर्हि सततं सुरप्रिया ॥ ५० ॥

सपदि वरुणदेवस्याज्ञयाऽभूत्पयोधिः
समुपरमितसर्वाटोपसंशान्तवीचिः ।
अपि गुरुपरिवारः सौख्यसंप्राप्ततीरः
शमितभयविकारः स्वान्तसंशान्तिपूरः[3] ॥५१॥

आज्ञामात्रेण विष्णोर्विधिवरुणमुखा देववर्याः समस्ताः ।
वर्तन्ते भक्तियुक्ता अवनतशिरसा स्वस्वकार्येष्वतन्द्राः ॥
इत्येवं शास्त्रसारं श्रुतमपि बहुधा शिष्यचित्तेऽनुभूत्या ।
संवादो दार्ढ्यहेतुस्त्विति च सुवचनं स्थापयामास[4] योगी ॥५२॥

---

१. नन्दिन्या लक्ष्म्याः पतिः । अत एव बन्धुर्जामाता ।

२. स्निग्धता द्रवद्रव्यता स्नेहो वा ।

३. मालिनी.

४. विष्णोराज्ञया वरुणः समुद्रं शान्तमकरोदिति प्रत्यक्षानुभवेन शिष्येभ्यः प्रदर्श्य 'सप्तार्धगर्भा भुवनस्य विष्णो'रिति शास्त्रसारं स्थापयामास तथा 'संवादो दार्ढ्यहेतु'रिति भगवत्पादवचनं च स्थापयामास ।

रामस्याङ्घ्रिं सकलविभवैस्तद्दिने पूजयित्वा
भक्ष्यैर्भोज्यैः सधनकनकैर्भूसुरांस्तोषयित्वा ।
पारं वार्धेरिव गमय नो घोरसंसारवार्धेः
साकं शिष्यैरिति गुरुवरः प्रार्थयद्रङ्गनाथम् ॥५३॥

॥ इति श्रीसत्याभिज्ञविजये रङ्गाङ्के चतुर्थः सर्गः ॥

॥ श्रीः ॥

श्रीमङ्गलमूर्तये नमः । श्री गुरुभ्यो नमः ।

अथ पञ्चमः सर्गः

अथ पवनागमशरधेः सन्ततमपि वृद्धिदो हि योगिविधुः ।
मनसि जननीं कन्यां द्रष्टुमयाच्चारुसर्वाङ्गीम् [१] ॥ १ ॥
अखिलजगद्वन्द्यां तां हरिदयितां श्रीकुतूहलकुमारीम् [२] ।
निजपतिकटाक्षशक्त्या ब्रह्मभवादेर्ननाम सृष्टिकरीम् ॥ २ ॥
अथ भक्तिवशः स सत्प्रियप्रियमानामधुरीं पुनर्गतः ।
यतिरस्य पदे समार्पयत् सुकृतं सेत्ववलोकनोद्भवम् [३] ॥ ३ ॥
त्वरितः सदभिज्ञयोगिभृङ्गो गुरुपादाम्बुरुहामृताभिलाषैः ।
भरितः स रघूत्तमाधिवासं तिरुकोलूरपुरं समाजगाम [४] ॥ ४ ॥

---

१. आर्या.

२. हरेर्दयिता ब्रह्मभवादेर्माता तथाऽपि कुमारीति कुतूहलम् । गीतिः.

३. सुन्दरी. ४. चन्द्रिका.

यथा यथा द्विरेफोऽयं पपौ तच्चरणामृतम् ।
तथा तथा तीव्रतरा द्विरेफाऽस्य तृषाऽभवत्[1] ॥ ५ ॥

तदनूत्तमबोधकरीः[2] सुकृती तदनुत्तमभावसुबोधकृतीः ।
रघुमुख्यगुरोरुपपादमसावुपपादयति स्म स मुख्यगुरुः ॥ ६ ॥

तत्परीवारदेवैः[3] समं राघवं तत्परीभूतचित्तोऽर्चयन्नस्मरत् ।
भक्तिसंसिद्धतन्मूर्तिमत्सन्निधिं भक्तिसंवित्तपोमूर्तिमत्सन्निधिम् ॥ ७ ॥

स वृन्दावने वीक्ष्य मातुःप्रतीकं ववन्दे गुरुं मातृभक्तिप्रतीकम् ।
समीक्ष्यास्य तां शीतवर्षातपेषु समेक्षां स तस्मात्तितिक्षां ययाचे[4] ॥ ८ ॥

वेदयति पूर्वमतबोधितदुरर्थं बोधयति मध्वमतसाधितसदर्थम् ।
योऽभिनवचन्द्रकलया तमृतनाथं सोऽभजत वीरपरचोलपुरसंस्थम्[5] ॥९॥

बहुधा विशङ्क्य जयतीर्थयोगिनो वचसामयोगमविमर्शगोचरम् ।
अथ यः प्रदर्शयति योगमुत्तममृतनाथमार्थयत योगसद्रतिम्[6] ॥ १० ॥

स पुरीमनन्तशयनं गतवान्गुरुभक्तिभारसुविनम्रशिराः ।
प्रणनाम नाभिकमलस्थविधिस्तुत-शेषतल्पशयनं परमम् ॥ ११ ॥

---

१. द्विरेफा रेफद्वयोपेततीव्रतरेतिपदबोध्या । पथ्यावक्रम्.

२. तदनु उत्तमबोधहेतून् अनुत्तमान् भावबोधग्रन्थान् रघूत्तमगुरोः पादसमीपे गुरूत्तमः प्रावोचत् । तोटकम्.

३. आवरणपूजाकाले, यस्य श्रीरघूत्तमस्य भक्त्या मूर्तिमतां परिवारदेवानां सन्निधिः संसिद्धोऽभूत् तं भक्तिज्ञानतपसां मूर्तिमतां मुख्याश्रयमस्मरत् । स्रग्विणी.

४. भुजङ्गप्रयातम्.

५. वीरचोलपुरेऽभिनवचन्द्रिकाप्रणेतारं श्रीसत्यनाथमभजत् । इन्दुवदना.

६. 'अयोगं बहुवाक्यानामुक्त्वा योगः प्रदर्श्यते' इत्यभिनवचन्द्रिकोक्तेः । मंजुभाषिणी.

स गुहामुखे स्थितमयाचतहृत्सुगुहास्थितिं यतिकुलाधिपतिः ।
पदवीत्रयेण निजदर्शनदं पदवीत्रयं स्वपददर्शनदम्[१] ॥ १२ ॥

क्षेत्रराजमयमाप्य पुरं श्रीमुष्णसंज्ञमिह भूमिवराहम् ।
कल्पनामपतिमेष ववन्दे कल्पनामतिगतं श्रुतिगम्यम्[२] ॥ १३ ॥

भूवराहमिह पूजकास्तदा पूजनाय गुरवे न्यवेदयन् ।
उत्तरादिमठमात्रवर्तिनी सा हि गौरवयुता परंपरा[३] ॥ १४ ॥

अथ वराहमिमं धरयाऽन्वितं रघुवरेण समं समपूजयत् ।
समवलोक्य समौ च समागतौ असमसंमुदमाप स मौनिपः[४] ॥१५॥

भूमिसुता रघुनन्दनपत्नी भूमिरसौ खलु सूकरपत्नी ।
भर्तृवराहयुता ननु माताऽपत्यगृहं हि गतेति न चित्रम्[५] ॥१६॥

कन्यादाता श्रीवराहः स एव कन्याऽऽदाता मूलरामः स एव ।
आश्चर्येऽस्मिंल्लोकबाह्ये विवाहे देवस्यैवाचिन्त्यशक्तिः पुरोधाः[६] ॥ १६ ॥

संहृत्य प्रबलतमं तमादिदैत्यं स्वस्थां त्वं भुवमकरोस्तत्तथाऽस्तु ।
संहृत्याद्य तु मम काममादिशत्रुं स्वस्थां मे कुरु धियमित्यमुं ननाम[७] ॥१७॥

---

१. त्रिभिर्द्वारैर्दर्शनप्रदमनन्तशयनं श्रवणमनननिदिध्यासनरूपमार्गत्रयमयाचत । प्रमिताक्षरा.

२. श्वेतवराहेतिकल्पस्य नाम्नः पतिं कल्पनां युक्तिपथमतिक्रान्तम् । स्वागता.

३. रथोद्धता. ४. द्रुतविलम्बितम्. ५. दोधकम्.

६. एकस्यैव श्वशुरजामातृभावस्याघटितस्य घटकः पुरोहितः देवस्याचिन्त्यशक्तिः । शालिनी.

७. आदिदैत्यं हिरण्याक्षम् । स्वस्थां स्वस्थानस्थितां भुवमकरोः । प्रहर्षिणी.

तोताद्रिपूर्वकपवित्रभुवश्चरंच्छ्री-
नाथाङ्घ्रिमेकमनसा प्रणमन्यतीन्द्रः ।
पूतान्तरोऽथ मधुरां पुरमाप्य तत्र
सीतान्तरङ्गदयितं समपूजयत्सः[1] ॥ १८ ॥

पुरे तत्र प्राप्तौ कुमतबलदृप्तौ बुधवरौ
जिगीषू योगीशः सपदि सपरःषष्ठ्यनुचरौ ।
ब्रुवाणः श्रुत्युक्तीर्निशिततरयुक्तीश्च सहसा
चकारैनौ भग्नौ परिभवनिमग्नौ गुरुवरः[2] ॥ १९ ॥

संप्राप्य स काञ्चीं तां पापनिहन्त्रीम्
संप्रीतमनाः सन् संप्रार्थयतैनम् ।
भक्त्या वरदेशं नत्वा पुरवासं
यत्यन्वयपालः सत्प्रज्ञसुबालः[3] ॥ २० ॥

वरं वृणे न तेऽन्यतो वरं च ते नहीतरत् ।
वरे मतेषु वैष्णवे वरां स्थिरां रतिं दिश[4] ॥ २१ ॥

मायावादध्वान्तोच्छित्तौ मित्रं मां त्वन्मित्रं कुर्याः ।
माध्वे सिद्धान्ताम्भोजाते हंसं मां त्वं हंसप्रेष्ठम्[5] ॥ २२ ॥

एवमसौ तीर्थपदेष्वाचरणैः संव्यदधात् ।
राममभुं तीर्थपदं प्रीततरं सानुचरम्[6] ॥ २३ ॥

१. वसन्ततिलका. २. शिखरिणी. ३. मणिमाला. ४. प्रमाणिका.
५. मित्रं सूर्यम् । हंसश्रेष्ठ यतिश्रेष्ठं मां हंसं कुरु । विद्युन्माला.
६. माणवकम्.

सर्वत्रासौ दरचक्रप्रदानैः पूतांश्चक्रे नितरां भूसुरेशान् ।
रामस्यैवं विधिसंपूजितस्य प्रीतान्दृष्ट्वा नितरां वै सुरेशान्[1] ॥ २४ ॥
ब्राह्मे मुहूर्ते प्रतिनित्यमेष उत्थाय चीर्णोचितनित्यकृत्यः ।
ब्रह्माभिधं राममयं व्रतीशो दध्यौ चिरं वर्धितचित्ततोषः[2] ॥ २५ ॥
ततः सुतीर्थेषु कृतावगाहो दरारिपद्माङ्कितपूतदेहः ।
विसृज्य निर्माल्यमसावनीहः श्रुतीशमीजे समपेतमोहः[3] ॥ २६ ॥
प्रभातकाले स्वपदावलोकसुपुण्यलोभेन समापतन्तीम् ।
मुहुर्नमन्तीं जनतां स दृष्ट्वा सद्योऽपुनान्नैजदयौघदृष्ट्या[4] ॥ २७ ॥
समाहिताग्निः कपिला च सत्रं नृपश्च भिक्षुश्च महोदधिश्च ।
प्रत्येकमेतानि पुनन्ति दृष्ट्या समस्तमेतत्सगुरुः कथं न[5] ॥ २८ ॥
जगत्प्रणेता निहितोऽस्य चित्ते मुक्तिप्रदं लाति सतश्च पाति ।
असौ हि मध्वागमचक्रवर्ती यतीश्वरो ज्ञानमहोदधिश्च[6] ॥ २९ ॥
विद्वद्द्विजेभ्यो गुरुवारिवाहो जयेन्द्रसन्दर्शितमार्गवर्ती ।
सुमध्वशास्त्रामृतवारिधारा ववर्ष तापत्रयशामयित्रीः[7] ॥ ३० ॥

---

१. वातोर्मी. २. इन्द्रवज्रा. ३. उपेन्द्रवज्रा.

४. उपजातिः. इतःपरं चतुर्दशश्लोकेषूपजातयः ।

५. 'अग्निचित्कपिला सत्रं राजा भिक्षुर्महोदधिः दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत नित्यशः ॥' इत्युक्तेः । एतत्समस्तभूतो गुरुः कथं न पुनीयात् ।

६. समस्तरूपत्वमेवोपपादयति जगदिति । अगं स्वतो गमनशक्तिरहितं जगन्न-यतीति अग्निर्जगत्प्रणेता श्रीरामोऽस्य चित्ते सन्निहित इति आहिताग्निः अग्निचित् । कं स्वरूपसुखं पाययतीति कपिर्मुक्तिप्रदः परमात्मा तं लाति उपदिशतीति कपिला । सतस्त्रायते इति सत्त्रम् । ७. लोके तु मेघ इन्द्रा-ज्ञया चातकेभ्यो बाह्यतापमात्रशामकं जलं वर्षति । अतोऽलौकिकोऽयं मेघः ।

यथायथाऽलौकिकयोगिमेघः संवर्षति स्वीयरसान्प्रकामम् ।
भूयः समिद्धप्रतिभातटिद्भान्संपूर्यते तैश्च ततोऽधिकैश्च[1] ॥ ३१ ॥
स्वाध्यायमेवं प्रवचश्च वेदाः प्राहुर्मुहुः सर्वतपःप्रधानम् ।
तपःप्रियस्यास्य ततो बभूव चिरं कृतेनापि न तेन तृप्तिः[2] ॥ ३२ ॥
भावामृतैर्मानसमण्टपस्थं जलैरथार्घ्यैर्मणिमण्टपस्थम् ।
चित्तेऽनिशं किन्तु बहिः कदाचिद्द्वेधा स सीतापतिमभ्यषिंचत् ॥३३॥
संपूजयन् राघवमीक्षमाणो बाह्यं विसस्मार सुखाब्धिमग्नः ।
चचाल नैवास्य मनो जनानां संमर्दमध्येऽपि यथा समाधौ ॥ ३४ ॥
ऐक्षन्त तीर्थे गुरुणा प्रदत्ते सत्सन्निधिं दिव्यदृशः सुराणाम् ।
संवर्णितानुष्ठितमङ्गलश्रीसुधाऽऽद्यशेषागमसंस्थितानाम्[3] ॥ ३५ ॥
भीमेन रामाय निवेदितस्य भुक्त्याऽच्युतेक्षो हि सुमध्वमाप ।
मध्वेन हृद्गेन गुरोर्द्विजेन्द्रा भुक्त्वाऽर्पितं तेऽच्युतबुद्धिमापुः[4] ॥ ३६ ॥
तिष्ठेत्क्षणं न श्रवणाद्विनेति मध्वोक्तिमेनां बहुमानयानः ।
पुनश्च भुक्तोत्थित एव शास्त्रं प्रावोचदासायमयं बुधेभ्यः ॥ ३७ ॥
दोलोत्सवेऽयाचत वीतनिद्रं चित्तं प्रभो मे कुरु वीतनिद्रम् ।
दोलायमानं च शिरः सुधाया गभीरतां वीक्ष्य मुहुर्ममेति ॥ ३८ ॥

---

१. वर्षणेनास्य रसो वर्धते । व्याख्यानेन ज्ञानमभिवर्धते ।
२. 'तद्धि तपः तद्धि तपः' इति श्रुतिः ।
३. संवर्णिता अनुष्ठितमङ्गलाश्च ये आगमास्तेषु संस्थितानां सुराणां सम्यक् सन्निधिं तीर्थे दिव्यदृशोऽपश्यन् ।
४. अच्युतप्रेक्षः पुरा पाण्डवालये भीमनिवेदितभोजनेन श्रीमध्वमाप । इदानीं गुरुहृदयान्तर्यामिणा मध्वेन अर्पितस्य भोजनेन द्विजाः अच्युते परमात्मविषये अच्युतां सुदृढां बुद्धिमापुः ।

निशाऽनिशाध्यानसुतत्परस्य क्षपाऽक्षपादादिमतार्दनस्य ।
दोषाप्यदोषागमचिन्तकस्य तमस्विनी चास तमोनिहन्त्री[1] ॥ ३९ ॥
विद्याविलासैर्गहनोपदेशैः प्रत्यग्रपाठैरथ सत्कथाभिः ।
प्ररोचनैश्चापि यथायथं स्वान्सन्तोषयामास गुरुप्रवेकः ॥ ४० ॥
बुधाग्रगण्येषु बुधेषु विद्यासम्पादनायाभिनवोद्यमेषु ।
श्रद्धायुतेष्वप्युत पामरेषु ततोऽयमासीत्समदृष्ट्युपेतः[2] ॥ ४१ ॥
अपत्यवत्पोषणपालनादिना हितोपदेशैः प्रियवृत्तितस्तथा ।
यथार्थवाक्यैरभवत्प्रशासनैः सुधोपदेशेन च शिष्यवत्सलः ॥ ४२ ॥
माता पिताऽतुल्यगुरुः सहोदर इष्टाप्तबन्धुः प्रभुरार्तिनाशनः ।
श्रीमातरिश्वेव तदन्वयोद्भवः सर्वस्वमासीच्चरणाश्रितात्मनाम्[3] ॥ ४३ ॥

श्रुतिविहितपथानां लङ्घने साग्रहेषु
युयुज उचितदण्डं शासको धर्मसम्राट् ।
हितमिदमुभयोर्यद्दण्डितस्याघहानिः
परमसुकृतलाभश्चापि दण्डप्रयोक्तुः[4] ॥ ४४ ॥

---

१. अनिशं आध्याने निरतस्य । दोषा रात्रिः । अदोषागमः सच्छास्त्रम् । तमस्विनी रात्रिः । तमः अज्ञानम् । रात्रावपि अक्षपादादिदुर्मतानि निरस्य सच्छास्त्रविमर्शनरतस्यास्य तमस्विन्यपि तमोनाशहेतुरिति चित्रम् ।

२. बुधाग्रगण्येषु विद्याविलासैः बुधेषु गहनोपदेशैः । नूतनविद्यार्थिषु प्रत्यग्रपाठैः । श्रद्धायुतेषु सत्कथाभिः, पामरेषु प्ररोचनैरितिक्रमेणान्वयः इयमेव समदृष्टिः ।

४. मालिनी.

३. 'मातर्मे मातरिश्वन्' इत्यादिनोक्तं मातरिश्वन इव तद्वंशोद्भवानां गुरूणामपि शिष्यान्प्रति मातृत्वादिकं व्यनक्ति अपत्यवदित्यादिना श्लोकद्वयेन । पोषणेन माता, पालनेन पिता, हितोपदेशैरतुल्यगुरुरित्यादिना क्रमेणान्वयः ।

स्वमतं सततं स ततं विदधत् कुमतानि ह तानि हतानि सदा ।
अमरैः सहितं स हितं सुमहो हरिनाम ननाम न नामगुरुः[1] ॥ ४५ ॥

इत्येवं विचरन्स राणीबिन्नूरपत्तनं संप्राप्तः ।
विद्याधिपतीर्थानां पावनपादप्रणामकामस्त्वरितः ॥ ४६ ॥

मुनिशेखरस्य पादावुपगम्य भक्तितः प्रणम्याथ ।
सुकृती समस्तसुकृतं समर्पयामास तत्पादे[2] ॥ ४७ ॥

नानाननेन नैनोऽन्नं नो नूनं नुन्ननेननुः ।
नानानृनीननान्नेन नुन्नानेनोऽननेननुः[3] ॥ ४८ ॥

न्यक्कृत्याराच्चृणसमतया लौकिकं शुद्धसत्वो
व्याख्याने यो नियतनिरतो मध्वमुन्यागमानाम् ।

---

१. तोटकम्. ततं विस्तृतम् । हतानि खण्डितानि । हरिनामकं हितप्रदं शोभनतेजोरूपं परमात्मानम् । नाममात्रेण न गुरुः किन्तु सिद्धान्तप्रतिष्ठापकः।

२. चपलाज्ञा.

३. सद्भिः संपादितं सुकृतं कोटिगुणितं मुख्यप्राणः एव मुख्यतः प्राप्नोति 'स्वामी हि फलमश्नुते नास्वामी'ति श्रुतेरित्याह नानेति । नानाननेन नानाविधतीर्थ सञ्चारादिव्यापारेण प्राप्तं नैनोऽन्नं पापविरोधि पुण्यरूपं भोग्यं नुन्ननेननुः नुन्नस्य प्रेरितस्य अत एव नेनस्यास्वामिनो नुर्जीवस्य नो न भवति नूनं निश्चयः । तर्हि कस्य तत्सुकृतफलमित्यत आह नानानृनीनेति । नानानॄः अनन्तजीवान्नयतीति नानानृनीः स चासौ इनश्च प्रभुश्च नान्नश्च 'अन्यो निरन्नोऽपि बलेन भूया'नित्युक्तेर्निरन्नश्च नानानृनीननान्नः परमात्मा तेन नुन्नः प्रेरितः अनेनाः पापरहितः अननानां इनः मुख्यप्राणः स चासौ ना पुरुषो जीवोत्तमो वायुस्तस्यैव ।

उद्भूतोऽब्धौ विधुरिव कुले गुत्तलाख्ये सुकीर्ती
रङ्गार्याख्योऽलमकृत भुवं भक्तिवैराग्यमूर्त्तिः[१] ॥ ४९ ॥
सत्ये स्वस्मादभिज्ञान्मुनिवरचरिताल्लब्धजन्मानमेषः
दृष्ट्या मोदं प्रकृष्टं मनसि विदधतं सज्जनानां द्विजेन्द्रः ।
पश्चाद्राजेतिशब्दं प्रथमगुरुपदं हन्त नाम्ना चकार
बालस्यैतस्य जानन्निव खलु जनको भावियोगीन्द्रवृत्तिम्[२] ॥ ५० ॥
स आश्रमं प्रथममुपेत्य बालको निसर्गजाप्रतिमसुमेधया युतः ।
अनारतं निजजनकेन पाठितानधीतवाञ्छ्रुतिनिचयान्षडङ्गकान्[३] ॥५१॥
प्रमाणपद्वीं दशप्रकरणानि वादावलीं
सुपूज्यपितुरन्तिके स समधीतवान्सादरम् ।
अथोत्तरसदागमाधिगमकाम एषोऽभजत्
सुधीर्कृतविचिन्तनाभिधयतीन्द्रपादान्तिकम्[४] ॥ ५२ ॥
स मुनीश्वरात्तदनु षट्पदायितो बुधकृतविशिष्टबोधतः ।
प्राप सदभिमतितीर्थयतेश्च सुधादि शास्त्रसरसीरुहामृतम्[५] ॥ ५३ ॥

---

१. इदानीं श्रीसत्प्रमोदतीर्थायाश्रमदानं वक्तुं तत्पूर्वाश्रमपितुः परमपरिशुद्ध-महिमानमाह न्यक्कृत्येति । अलमकृत अलञ्चकार । मन्दाक्रान्ता.

२. सत्ये परमात्मविषयेऽभिज्ञात् मुनिवरसदृशचरितात् स्वस्मादुत्पन्नं सतां प्रकृष्टमोदपदं बालं जनको नाम्ना 'गुरुराजं' चकार । अग्रे एष सत्याभिज्ञा-ख्यमुनिवरादाश्रमं प्राप्य श्री सत्यप्रमोदतीर्थेति नाम्ना वेदान्तविद्याया राजा प्रथमगुरुः श्रेष्ठगुरुश्च भविष्यतीति तस्य भावियोगीन्द्रवृत्तिं जानन्निव ।
स्रग्धरा.

३. रुचिरा. ४. उत्तरग्रन्थाध्ययनाय श्रीसत्यध्यानतीर्थचरणं अभजत् । पृथ्वी.

५. ततः सत्याभिज्ञतीर्थश्च शास्त्रसारं षट्पद इव प्राप । उद्गता.

सत्याभिज्ञमुनीश्वरो रघुपतेः पूजावसानेऽन्वहं
ज्ञानानन्दमयौ प्रणामसमये पादौ स्वमूर्ध्ना स्पृशन् ।
सत्सौख्यामृतसिन्धुसंप्लवशुचिज्ञानेन शुद्धान्तरः
साम्राज्यं समपीपलत्क्षणमिवानन्देन वर्षत्रयम्[1] ॥ ५४ ॥

अनुपमशमपूर्वसद्गुणाय बुधमणये गुरुराजवर्यनाम्ने ।
तदमलगुणसुप्रसन्नचेताश्चरममथादिशदाश्रमं व्रतीन्द्रः[2] ॥ ५५ ॥

श्रीव्यासमस्तकुहकं गुणसन्निकायं लक्ष्म्यालयं श्रुतितति श्रुतमध्ववासम् ।
संवादवानथ निधाय तदुत्तमाङ्गे योगेशगेयपद एनमथाभ्यषिञ्चत्[3] ॥५६॥

संवर्धतां तव हरेः पदयोः सुभक्तिः
संवर्धतां त्वयि च राघवसंप्रसत्तिः ।
जीयाद्दिशस्तव यशो विदिशश्च वत्से-
त्याशीर्भिरप्यमुमसौ गुरुरभ्यषिञ्चत्[4] ॥ ५७ ॥

इति यतिपतिर्वेदान्तानां चिरं परिपालने
प्रणयभरितः संस्थाप्यैनं गुरूचितसद्गुणम् ।
रहसि च मनुं जाप्यं गोप्यं हृदोपदिश्य स
व्यधित तनयं प्रीत्या सत्यप्रमोदपदाभिधम्[5] ॥ ५८ ॥

प्रमोद उत्तरः पक्ष इति श्रुतिमतं पदम् ।
स्वोत्तरस्य गुरूक्तं तत्त्रिदशा अन्वमन्वत ॥ ५९ ॥

---

१. शार्दूलविक्रीडितम्. २. पुष्पिताग्रा.

३. संवादवान् स्वसङ्कल्पसमानविषयकभगवत्प्रेरणावान् । उत्तराधिकारिणो नूतनयतेः सम्मातिमांश्च । योगेशैः इतरपीठाधिपतिभिर्गेयं स्तुत्यं पदं वेदान्तचक्रवर्तिपदं तस्मिन् । श्रीबन्धः । वसन्ततिलका.

४. वसन्ततिलका. ५. हरिणी.

जेता सर्वान्कुसमयपथान्सर्वजिन्नामकेऽब्दे
पुष्यञ्च्छ्रीशो निजजनरतिं पुष्यमासे कृपालुः ।
कृष्णे पक्षे दशमतिमते कृष्णपक्षे स्थितोऽसा-
वष्टम्यां श्रीरघुपतिमयादष्टदिक्श्रान्तकीर्तिः[1] ॥ ६० ॥

मध्वार्यागमपद्धतौ स्थिररतिं सद्योऽनवद्यां परां
विद्यां च स्वपदाम्बुजाश्रितसतां शुद्धां च भक्तिं दिशन् ।
अद्यापि त्रिदशद्रुमाभमहिमा हृद्ये सुवृन्दावने
विद्याधीशपदान्तिके सुविमलो विद्योतते सद्गुरुः ॥ ६१ ॥

यत्कारुण्यसमाश्रयैकबलवान्सन्मोदतीर्थः सुधी-
र्दुष्टाद्वैतविषं निरस्य विदधे स्पष्टं सुधामण्डनम् ।
संशुद्धेन पथाऽभिरक्षति महावेदान्तराज्यं चिरं
सोऽयं श्रीसदभिज्ञतीर्थगुरुराड् दद्यादलं मङ्गलम्[2] ॥ ६२ ॥


यदीयकरुणालवः प्रतिपदं समुद्बोधयन्
सुमन्दमतिनाऽप्यहो कृतिमिमां मयाऽकारयत् ।
स एव च समर्प्य तां शिखरिरङ्गपादाम्बुजे
सुमोदवरतीर्थराडवतु मां स्वदासं सदा[3] ॥ ६३ ॥

॥ इति श्रीसत्याभिज्ञविजये रङ्गाङ्के पञ्चमः सर्गः ॥

---

१. मन्दाक्रान्ता. २. शार्दूलविक्रीडितम्.

३. शिखरिरङ्गः ग्रन्थकर्तुः कुलदेवता । सुमोदवरतीर्थराट् श्रीसत्यप्रमोदतीर्थयतीश्वरः । पृथ्वीवृत्तम्.



श्रीव्यासमस्तकुहकं गुणसन्निकायं
लक्ष्म्यालयं श्रुतिततिश्रुतमध्ववासम् ।
संवादवानथ निधाय तदुत्तमाङ्गे
योगेशगेयपद एनमथाभ्यषिञ्चत् ॥

स. वि. सर्ग ५ श्लोक ५६

॥ श्री ॥

श्रीपादांची जन्मलग्नकुण्डली

श्रीशके १८४० कालयुक्तनाम संवत्सर

आश्विन शुद्ध पञ्चमी गुरुवार

ता. १०-१०-१९१८

८ मं. च. रा.	५ श.		४
९	७	र. बु. ६ शु.	गु. ३
१०			के. २
११	१२		१

शुभमस्तु

Printed By : Sudha Mudrana Mandiram
Uttaradi Mutt Compound, Shankarpuram
BANGALORE–560004.